# कविनामाङ्कताष्टदळ पद्म बन्धः




वामाह्त्राण रागानघमहिमघनश्याम ते श्रीक्षमा वा

वामाक्ष श्री शुभं त्वत्सदवनवदसत्क्रुद्रथाङ्गादिरावा ।

वारादिङ्गाम्हि सुस्था मतिगतगतिमत्राकरोस्वङ्गमावा

वामाङ्गस्वन्नमस्ते ह मतउत महत्पालमात्राहि मा वा ॥ 76 ॥

वामे ति । अनघमहिम घनश्याम-स्पष्टं । ते वामा-रम्या श्रीः रमा । त्राणरागा हि-भक्तरक्षणमकामा खलु । हे वामाक्ष-रम्यनेत्र । क्षमा-क्षान्तिः । श्री-संपत् । शुभं-मङ्गळं । हरा-वाक् च । सदवनवत्-सरधुरक्षणशालि । असत् क्रुत्-असत् विषयक कोपञ्च । यद्रथाङ्गं - चक्रं, तत् यस्य - तस्मात् त्वत्र त्वत्र

एव सिध्यतीति शेषः । स्वंगमावा-अत्र वा इत्युपमाने शेभन देह लक्ष्मीवत् इत्यर्थः । वामाङ्ग रम्यदेह । वाः - जलं आदिः यस्याः तां । गां-भूमिं अतिगतगतिं - गत्यन्तररहितत्वेन रसातलस्थां । सुस्थां - वराहावतारकाले सुप्रतिष्ठामकरोः । अतः मा-मां त्राहि रक्ष । उत-अथवा मा-मा त्रहीत्यर्थः । अथमत्राशयः यथा स्वशेष भूतां स्वपत्नी भूताञ्च भूमिं असुरेण रसातलनीतां आलोक्य निर्व्याजकृपया वराहरूपेणावतीर्य तदुद्धरणमकरोः । तत्वत् ममापि त्वत् शेषत्वेन त्वदीयत्वात् मद्रक्षणं तवैव भरः । अतः मम रक्षण अरक्षणे च मम विचारो नास्तीति ।

बाह्यदळाष्टके ''रामभद्रसुकमल'' इत्युद्धारः ।

## बहिः कविनामाङ्कताष्टदळ पद्मस्यैव रेखा भेदः



# विषयनामाङ्किताष्टदळ बन्धः




नन्दात्मजन् दयासारं गोपीभाग्यं परात्परं ।

सुराधीशं तमोदूरमेति हृन्मेतिसुन्दरं ॥ 77 ॥

दळाग्रेषु नन्दगोपसुत मेति इति विषयनामोद्धारः ।

स्पष्टोर्थः (इण् - गतौ - मे हृत् एति अतिसुन्दरम्)

## द्वादशदळ पद्म बन्धः

चतुरर चक्र बन्धे लिखितोयं श्लोकः




मा रमा तेन्दिरा नामऽमानाराध्यपदाऽसमा ।
मा सदा प्रणतं भीमाऽमाभीतं पातु मा रमा ॥ 78 ॥

# षोडशदळ पद्म बन्धः




उमा क्षमादिमाद्यमा रमाताऽमान्यमाऽक्षमा ।

सोमार्यमा क्षमान्यामाऽसमाऽवमा रमा ॥ 79 ॥

उमेति । उमा क्षमादिमाद्यमा - उमा क्षमादिमानां पार्वती वसुन्धरा प्रभृति स्त्रीणां आद्या-मुखभूता । मारमाता - स्पष्टं । अमान्यमाऽक्षमा - अमानिषु - साधुषु या अमा-अज्ञानं तन्न क्षमत इति तदक्षमा । सोमार्यमा क्षमान्या - चन्द्रसूर्यलोचन भगवन् - नान्या। असमा, वामा-रम्या रमा-रमानामेत्यर्थः । मा-मा शब्दवाच्या त्वमिति शेषः । मा-मां अव-रक्ष ।

# द्वादशदळ नळिन बन्धः




माद्यसऽसाममाऽमनमहिमा माधवीरमा ।

मारमाताऽसमा मास दयाऽभी माऽतुलोद्यमा ॥ 80 ॥

व्या-मा-अद्य-सा-असमसा-अतुल्य ज्ञानेत्यर्थः अमानमहिमा-अप्रमेय प्रभावेत्यर्थः । माधवी-रमा मारमाता-असमा-मा-मामित्यर्थः - सदया - अभीमा अतुलोद्यमा - अप्रतिहतोद्योगेति भावः । पात्विति शेषः ।

# विलक्षणचतुर्दळ पद्म बन्धः

जानकीश नरदानवामर व्रात पूजित विनीतवत्सल ।
मामरासम गुणामलात्मभिर्ध्येय मत् भयहराय ते नमः ॥ 81 ॥

स्पष्टोर्थः

(मां अव ! असम ! गुणामलात्मभिः ध्येयः !
नर दानव अमरव्रात पूजित ! विनीतवत्सल !
मत्भयहराय ते नमः ॥ – PKS )




## पञ्च दळ उत्पल बन्धः




सकलामर संसेव्यं जंगमस्थायिनां पतिं ।
राम प्रीतिं मम स्वान्त भज रंग पतिं भज ॥ 82 ॥

स्पष्टोर्थः

रामे प्रीतिं राम प्रीतिं भज हे मम स्वान्त । भज रंगपतिं ।

# षोडश दळ कमल बन्धः

रमाऽसमा सुमाक्षमा रसा सदा सुरक्षणा ।

रजस्कृताग सामघं समस्तमत्र दारुणं ।

सुमाना सानिरस्यनः क्षमा शुभेक्षणावतु ।। 83 ।।

व्या- रमा - असमा - सुमा - समीचीबज्ञाना - क्षमा - रसा- क्षान्ति गुण प्रिया - सदा सुरक्षणा - सर्वदा निर्व्याज रक्षणा - सुमानसा- अत एव समीचीन हृदया - क्षमा शुभेक्षणा क्षमया - शुभे - कारुण्यार्थे ईक्षणे यस्यास्या - रजस्कृतागसां - रजो रचिता पराधानां - नः - दारुणं - समस्तं अघं निरस्य अवतु ।



# द्वात्रिंशत्दळ कमल बन्धः

उदग्रं सर्व वीरन्तं मन्युहाररतं विभुं ।

जिष्णुं ज्वलत्प्रभाभान्तं सर्वचेतोदमुन्नखं ॥ 84 ॥

नृशक्ति सिंहं रक्षोभीपोषणं भक्त भद्रदं ।

अमृत्युं मृत्युहं वन्दे सन्नतं मावकाम्यहं ॥ 85 ॥

अस्मिन् नृसिहं विषय श्लोक द्वये-

उग्रं वीरन्महाविष्णुं ज्वलन्तं सर्वतोमुखं ।

नृसिंहं भीषणं भद्रम्मृत्युमृत्युन्नमाम्यहं ॥

इति नृसिंह महामन्त्रोद्वारः तत्र तत्र द्रष्ट व्यः ।




(By PKS)

उद्ग्रं - महोन्नतं । मन्युहाररतं - भक्त शोकहरण प्रियं ज्वलत्प्रभयालसन्तं । सर्व चेतोदं-सर्वेषां योगिनां चेतोभिः गृहीतं योगिध्येयमित्यर्थः । उन्नखं-हिरण्य वक्षोविधारणाय ऊर्ध्व मुख नखं । मृत्युहं - भक्त मृत्युजाशकं । शिष्टं स्पष्टं अहं कामी-फलकामः । सन्नतं तदर्यं शरणागतं मां अव नृसिंहेति संबोधन पद मध्याहार्यं । हार्यं । तं क्लीबे पान वैराग्य कळत्रेष्ववलोकने । भेद्य लिंगस्त्वयं मूके ग्रहीते द्रावके शुचौ । इति नानार्थ रत्नमाला ।– PKS )




(By Poet)